# प्रश्नपत्र - योजना

कक्षा- उच्चमाध्यमिकक्षा

विषयः-संस्कृतसाहित्यम् (SS12)

अवधिः-3 घण्टे 15 मिनट (सपादहोरात्रयम्) पूर्णांका:-80

1. उद्देश्यानाम् अंकभारः –

| क्र.स. | उद्देश्यम् | अंकभार | प्रतिशतम् |
|---|---|---|---|
| 1. | ज्ञानम् | 23 | 28.75% |
| 2 | अवबोधः | 24 | 30.00% |
| 3. | ज्ञानोपयोगः | 16 | 20.00% |
| 4 | कौशलम् | 09 | 11.25% |
| 5 | विश्लेषणम् | 08 | 10.00% |
| योगः | | 80 | 100% |

2. प्रश्नानां प्रकारानुसारम् अंकभारः–

| क्र. सं. | प्रश्नानां प्रकाराः | प्रश्नानां संख्याः | प्रतिप्रश्नम् अंकाः | कुलांकाः | प्रतिशतम् अंकानाम् | सम्भावितः समयः |
|---|---|---|---|---|---|---|
| 1. | बहुविकल्पात्मकप्रश्नाः | 1 | 1 | 16 | 20.00% | 25 निमेषाः |
| 2 | रिक्तस्थानम् | 1 | 1 | 04 | 5.00% | 10 निमेषाः |
| 3 | अतिलघूत्तरात्कप्रश्नाः | 1 | 1 | 18 | 22.50% | 32 निमेषाः |
| 4 | लघूत्तरात्मकप्रश्नाः | 9+1 | 2+2 | 18+4 | 27.50% | 45 निमेषाः |
| 5 | दीर्घोत्तरीयप्रश्नाः | 2+1 | 3+3+4 | 10 | 12.50% | 33निमेषाः |
| 6 | निबंधात्मकप्रश्नाः | 2 | 5 | 10 | 12.50% | 50निमेषाः |
| योगः | | 18 | | 80 | 100 | 195 निमेषाः |

3. विषयवस्तूनाम् अंकभारः

| क्र. सं. | विषयवस्तुः | अंकभारः | प्रतिप्रश्नम्–अंकाः |
|---|---|---|---|
| 1. | पठित–अबबोधनम् | 30 | 37.50% |
| 2 | संस्कृतसाहित्येतिहासस्य परिचयः | 10 | 12.50% |
| 3 | छन्दोऽलंकाराः | 10 | 12.50% |
| 4 | अपठित-अवबोधनम् | 8 | 10.00% |
| 5 | रचनात्मककार्यम् | 10 | 12.50% |
| 6 | व्याकरणम् | 12 | 15.00% |
| योगः | | 80 | 100 |

BSER

प्रश्न-पत्रस्य नीलपत्रम् (ब्ल्यू प्रिन्ट)

कक्षा-उच्चमाध्यमिकः कक्षा-द्वादशी (XII) विषयः - संस्कृत-साहित्यम् पूर्णांकाः – 80 अङ्काः

| क्र. सं. | उद्देश्यविधाः/उपविधाः | ज्ञानम् | | | | | | अवबोधः | | | | | | ज्ञानोपयोगः / अभिव्यक्तिः | | | | | | कौशलम्/मौलिकता | | | | | | विश्लेषणम् | | | | | | योगः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | बहुवि.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुवि.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुवि.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुवि.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | बहुवि.प्रश्नाः | रिक्तस्थानम् | अति.लघु. | लघूत्तरात्मकः | दीर्घोत्तरीयः | निबन्धात्मकः | |
| 1. | पठित-अवबोधनम् | 7(1) | | | 2(1) | | | 7(-) | | | | | | | | | 8(1) | 3(1) | | | | 3(3) | | | | | | | | | | 30(7) |
| 2. | संस्कृतसाहित्येतिहासस्य परिचयः | | | 10(1) | | | | | | | | | | | | | | | | | | | | | | | | | | | | 10(1) |
| 3. | छन्दोऽलकाराः | | | | | | | 2(-) | | | | 3(1) | | | | 1(1) | 4(2) | | | | | | | | | | | | | | | 10(4) |
| 4. | अपठित-अवबोधनम् | | | | | | | | | 4(1) | 4(-) | | | | | | | | | | | | | | | | | | | | | 8(1) |
| 5. | रचनात्मककार्यम् | | | | | | | | | | | | | | | | | | | | | | | | 2(-) | | | | | | 8(2) | 10(2) |
| 6. | व्याकरणम् | | | | 4(1) | | | | 4(1) | | | | | | | | | | | | | | | 4(1) | | | | | | | | 12(3) |
| | योगः | 7(1) | | 10(1) | 6(2) | | | 9(-) | 4(1) | 4(1) | 4(-) | 3(1) | | | | 1(1) | 12(3) | 3(1) | | | | 3(3) | | 4(1) | 2(-) | | | | | | 8(2) | |
| | सर्वयोगः | 23(4) | | | | | | 24(3) | | | | | | 16(5) | | | | | | 9(4) | | | | | | 8(2) | | | | | | 80(18) |

विकल्पयोजना :- खण्ड–स–द–योः” प्रत्येकम् एकः प्रश्नः आन्तरिकविकल्पात्मकः अस्ति । अवधेयम् – कोष्ठकात् बहिः संख्या अंकबोधिका आन्तरिकसंख्या च प्रश्नबोधिका ।

No. of Questions- 18

No. of printed Pages -

# आदर्शप्रश्नपत्रम्- 2025

## उच्चमाध्यमिकपरीक्षा- (xii)

## कक्षा-उच्चमाध्यमिकक्षा

## विषयः- संस्कृतसाहित्यम् (कोडः- ss12)

**समयः 3:15सपादहोरात्रयम्** **पूर्णांका:– 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः-**

(1 )परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामांकः अनिवार्यतो लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः।

(3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेख्यानि ।

(4)एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेख्यानि।

(5) सर्वेषां प्रश्नानामुत्तराणि संस्कृतमाध्यमेनैव लेखनीयानि ।

BSER

# आदर्शप्रश्नपत्रम् - 2025

## कक्षा-उच्चमाध्यमिक (xii)

## विषयः - संस्कृतसाहित्यम्, (कोड-12)

**समयः 3:15 सपादहोरात्रयम्** **पूर्णांकाः - 80**

**खण्डः-"अ"**

**1. बहुविकल्पात्मकप्रश्नाः-** **10x1=10**

**(i) "रघुकौत्ससंवादः" पाठस्य लेखकः कः?** **1**

(अ) कालिदासः (ब) भवभूतिः

(स) बाणभट्टः (द) भर्तृहरिः

**(ii) ईशावास्योपनिषदि कति मन्त्राः सन्ति -** **1**

(अ) विंशतिः (ब) अष्टादश

(स) सप्तदश (द) पञ्चदश

**(iii) 'बालकौतुकम्' इति पाठः कस्य नाटकस्य भागोऽस्ति?** **1**

(अ) उत्तररामचरितस्य (ब) महावीरचरितस्य

(स) रघुवंशस्य (द) अभिज्ञानशाकुन्तलस्य

**(iv) कस्मै पापान्निवारयति योजयते?** **1**

(अ) पुण्याय (ब) स्वीयकर्मणे

(स) हिताय (द) समाजाय

**(v) प्रत्यक्षानुमानागमाःभवन्ति -** **1**

(अ) कारकाणि (ब) प्रत्यहारसूत्राणि

(स) कार्याणि (द) प्रमाणानि

**(vi) कादम्बरीकथानुसारेण चन्द्रापीडं कः उपदिशति?** **1**

(अ) हर्षवर्धनः (ब) बाणभट्टः

(स) शुकनासः (द) पुण्डरीकः

**(vii) शिववीरस्य विश्वासपात्रं किम् आदाय तोरणदुर्गं प्रयाति?** **1**

(अ) संवादम् आदाय (ब) पत्रम् आदाय

(स) पुष्पगुच्छम् आदाय (द) अश्वम् आदाय

**(viii) 'सकलः' इति शब्दस्य कोऽर्थः?** **1**

(अ) सम्पूर्णः (ब) अधिकः

BSER

(स) न्यूनः (द) मुखम्

**(ix) 'या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता ।'वाक्येऽस्मिन् किं छन्दः?** **1**

(अ) शार्दूलविक्रीडितम् (ब) उपजातिः

(स) मालिनी (द) वसन्ततिलका

**(x) 'भेदे साधर्म्यम्' इति कस्मिन्नलङ्कारे भवति ?** **1**

(अ) रूपकालङ्कारे (ब) उपमालङ्कारेः

(स) यमकालङ्कारे (द) श्लेषालङ्कारे

**2. रिक्तस्थानानि पूरयत- (यथानिर्देशं प्रकृतिप्रत्यय-संयोगं कृत्वा लिखत)** **4x1=4**

(क) सा कथां -------------------- प्रसन्ना भवति। (नि+शम् + ल्यप् ) 1

(ख) मया संस्कृतं ................................ । (पठ् + तव्यत्) 1

(ग) यतिः वने --------------------तपति। (नि+वस् + शतृ) 1

(घ) ह्यः बालकः विद्यालयं .......................... । (गम्+क्तवतु) 1

**3. अतिलघूत्तरात्मकप्रश्नाः-** **10x1=10**

(i) रघुवंशमहाकाव्यस्य लेखकः कः? 1

(ii) वेदस्य सारः केषु समाहितो वर्तते ? 1

(iii) महाकविभवभूतिना कति नाटकानि रचितानि? 1

(iv) श्रीमद्भगवद्गीतायां विषादग्रस्तः कोऽस्ति ? 1

(v) कस्मिन् ग्रन्थे पुण्डरीक–चन्द्रापीडयोःचरितं वर्णितम् ? 1

(vi) श्रीचन्द्रशेखरदासवर्मा कस्मिन् साहित्यक्षेत्रे लब्धप्रतिष्ठः कथाकारो वर्तते? 1

(vii) 'जयपुरवैभवम्' इति महाकाव्यस्य लेखकः कः? 1

(viii) 'विद्योदयः'नामसंस्कृतपत्रिकायाः सम्पादकः कः? 1

(ix) अम्बिकादत्तव्यासस्य ऐतिहासिकोपन्यासःकोऽस्ति ? 1

(x) 'पाषाणकन्या' कथाग्रन्थस्य लेखकः कः? 1

**4. अधोलिखित-श्लोकांशस्य अलङ्कारलक्षणं लिखत।** 1

वहन्ति वर्षन्ति नदन्ति भान्ति।

**खण्डः-"ब"**

**5. अधोलिखितयोः छन्दसोः एकस्य छन्दसः लक्षणमुदाहरणञ्च लिखत।** 2

BSER

(क) वसन्ततिलका (ख) मालिनी

**6. अधो लिखित-श्लोकांशयोः एकस्य गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरुत ।** 2

(क) भवन्ति नम्रास्तरवः फलोद्गमैः । (ख) मनो मे सम्मोहस्थिरमपि हरत्येष बलवान्।

**7.अधोलिखित-श्लोकांशयोः एकस्य हिन्दीभाषायां सप्रसङ्गं भावार्थं लिखत।** 2

(क) सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।

(ख) उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।

8. **अधोलिखितश्लोकस्य अन्वयं लिखत ।** 2

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।

9. **अधोलिखितपदानां सूत्रोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत।** 2+2=4

(अ) अन्वयः (ब) मातृच्छाया

**10. अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।** **8**

**स्वामी दयानन्द: एक: महापुरुष: आसीत् । तस्य महोदयस्य जन्म गुजरातप्रदेशे टंकारानामके नगरे अभवत् । तस्य महोदयस्य बाल्यकालस्य नाम मूलशङ्करः आसीत् । सः सर्वप्रथम:आर्यसमाजस्य स्थापनां मुम्बईनामके महानगरे अकुर्वत्।तस्य पितुर्नाम श्रीकर्षणदास: आसीत् । स्वामिदयानन्दस्य गुरोः नाम स्वामिविरजानन्दः आसीत् । स्वामिदयानन्दः उत्तरप्रदेशे मथुरानामके नगरे संस्कृतव्याकरणम् अपठत् । स्वामिदयानन्द: सम्पुर्णजीवने वेदानां प्रचारप्रसारम् अकरोत् । कुरीतीनां निवारणाय इतस्ततः अभ्रमत् । सः स्त्रीशिक्षाया: विधवा विवाहस्य सर्वदासमर्थनम् करोति स्म।**

**(क) एकपदेन उत्तरत -** **1**

(i) स्वामिदयानन्दस्य जन्म कस्मिन् प्रदेशे अभवत्?

**(ख) पूर्णवाक्येन उत्तरत ।** **2x2=4**

(i) क: वेदानां प्रचारम् अकरोत्?

(ii) स्वामिदयानन्द: कस्य स्थापनां अकरोत्?

**(ग) भाषा-सम्बद्धकार्यम्-** 1+1=2

(i) “सः स्त्रीशिक्षाया: सर्वदा समर्थनम् अकरोत् ” वाक्येऽस्मिन् अव्ययशब्दः अस्ति।

(ii) ‘कुरीतीनां निवारणाय इतस्ततः अभ्रमत् ।’ इत्यत्र क्रियापदं किम् ?

**(घ)अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ।** **1**

**खण्ड:- "स"**

**11. अधोलिखितं पठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।** **5**

BSER

**श्रीनायारस्य दायित्वग्रहणस्य एकमासाभ्यन्तरे बहुदिनेभ्यः स्थगितानां विविधसमस्यानामपि समाधानं जातम्। स्वकार्यं त्यक्त्वा अपरस्य सहकारस्तस्य परमधर्मः। सः प्रतिमासं प्रथमदिवसे स्ववेतनस्य अर्धाधिकं भागं केरलं प्रेषयति स्म। तेनानुमीयते तस्य राज्येन सह अस्ति कश्चित् सम्पर्कः। कानिचन मलयालमभाषायाः संवादपत्राणि अतिरिच्य कदापि तस्य नाम्ना किमपि पत्रामागतमिति कोऽपि कदापि न जानाति।**

**(क) एकपदेन उत्तरत -** **1**

किं त्यक्त्वा अपरस्य सहकारस्तस्य परमधर्मः?

**(ख) पूर्णवाक्येन उत्तरत -** **2**

श्रीनायारः कस्याः भाषायाः संवादपत्राणि जानाति ?

**(ग) भाषा-सम्बद्धकार्यम्-**

(i) ' तस्य राज्येन सह अस्ति कश्चित् सम्पर्कः। ' इत्यत्र क्रियापदं किम् ? 1

(अ) तस्य (ब) राज्येन (स) अस्ति (द) सम्पर्कः

(ii) 'अपरस्य सहकारस्तस्य परमधर्मः' वाक्येऽस्मिन् विशेषणपदं किम् ? 1

(अ) त्यक्त्वा (ब) तस्य (स) स्वकार्यं (द) परमधर्मः

**अथवा**

**तात! चन्द्रापीड! विदितवेदितव्यस्याधीतसर्वशास्त्रस्य तेनाल्पमप्युपदेष्टव्यमस्ति। केवलञ्च निसर्गत एवातिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। अप्रबोधा घोरा चराज्यसुखसन्निपातनिद्रा भवति, इत्यतः विस्तरेणाभिधीयसे।**

**गर्भेश्वरत्वमभिनवयौवनत्वम्, अप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थ–परम्परा। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालन–निर्मलापि कालुष्यमुपयाति बुद्धिः। नाशयति च पुरुषमत्यासङ्गो विषयेषु।**

**(क) एकपदेन उत्तरत -** **1**

अपरिणामोपशमो दारुणो किं विद्यते ?

**(ख) पूर्णवाक्येन उत्तरत।** **2**

निसर्गत एवातिगहनं तमो किम्?

**(ग) भाषा-सम्बद्धकार्यम्-**

(i) '**राज्यसुखसन्निपातनिद्रा भवति**' इत्यत्र क्रियापदं किम् ? 1

(अ) निद्रा (ब) सन्निपातम् (स) भवति (द) राज्यसुखम्

(ii) '**कालुष्यमुपयाति बुद्धिः।**' इत्यत्रकर्तृपदं लिखत। 1

BSER

(अ) बुद्धिः (ब) नाल्पम् (स) कालुष्यम् (द) उपयाति

**12. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।** 5

**तमध्वरे विश्वजिति क्षितीशं, निःशेषविश्राणितकोषजातम् ।**

**उपात्तविद्यो गुरुदक्षिणार्थी , कौत्सः प्रपेदे वरतन्तुशिष्यः ।।**

**(क) एकपदेन उत्तरत -** **1**

**कौत्सः कस्य शिष्यः?**

**(ख) पूर्णवाक्येन उत्तरत -** **2**

**गुरुदक्षिणार्थी कः?**

**(ग) भाषा-सम्बद्धकार्यम् -**

(i) '**उपात्तविद्यो गुरुदक्षिणार्थी** ' इत्यत्रविशेषणपदं किम् ? 1

(अ) गुरुः (ब)उपात्तविद्यो (स) दक्षिणार्थी (द) क्षितीशम्

(ii) ' क्षितीशम् ' इतिपदस्य पर्यायपदंलिखत। 1

(अ) राजानम् (ब) मित्रम् (स) शिष्यम् (द) न कोऽपि

**अथवा**

**केयूराणि न भूषयन्ति पुरुषं हाराः न चन्द्रोज्ज्वलाः,न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्ध्जाः।**

**वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।।**

**(क) एकपदेन उत्तरत -** **1**

कीदृशाः हाराः पुरुषं न भूषयन्ति?

**(ख) पूर्णवाक्येन उत्तरत -** **2**

कीदृशी वाणी पुरुषं समलङ्करोति?

**(ग) भाषा-सम्बद्धकार्यम् -**

(i) 'क्षीयन्ते खलु भूषणानि' वाक्येऽस्मिन् क्रियापदं किम् ? 1

(अ) खलु (ब) हाराः (स) क्षीयन्ते (द) भूषणानि

(ii) ' वाण्येका समलङ्करोति' इत्यत्रकर्तृपदंलिखत। 1

(अ) वाण्येका (ब) जनाः (स) हाराः (द) कुसुमम्

**13. अधोलिखितं नाट्यांशं पठित्वाप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।** **5**

BSER

**मोहिनी - आचार्य! सम्प्रति वयं योगविषये सविस्तरं ज्ञातुम् इच्छामः।**

**(योगाचार्यः पाठमाध्यमेन योगशिक्षां शिक्षयति )**

**योगाचार्यः - प्रियच्छात्राः ध्यानेन श्रृणुत।**

**योगश्चित्तवृत्तिनिरोधः।**

**मोहनः - चित्तवृत्तिनिरोधः! अथ किं तात्पर्यम् अस्य?**

**योगाचार्यः - चित्तवृत्तीनां भेदः लक्षणम् चावगच्छन्तु प्रथमं, ततः विस्तरेण बोधयामि-**

**'प्रमाणविपर्ययविकल्पनिद्रास्मृतयः' इति**

**प्रमाणम् - अर्थात् प्रत्यक्षानुमानागमाः प्रमाणानि।**

**विपर्ययः - अर्थात् विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्।**

**विकल्पः - अर्थात् शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः।**

**निद्रा - अर्थात् अभावप्रत्ययालम्बनावृत्तिर्निद्रा।**

**स्मृतिः - अर्थात् अनुभूतविषयासम्प्रमोषः स्मृतिः।**

**(क) एकपदेन उत्तरत -** 1

पाठमाध्यमेन योगशिक्षां कः शिक्षयति?

**(ख) पूर्णवाक्येन उत्तरत -** 2

का नाम स्मृतिः?

**(ग) भाषा-सम्बद्धकार्यम्-**

(i) ' वयं योगविषये सविस्तरं ज्ञातुम् इच्छामः।' वाक्येऽस्मिन् सर्वनामपदं किम् ? 1

(अ) सविस्तरं (ब) ज्ञातुम् (स) योगविषये (द) वयम्

(ii) ' प्रियच्छात्राः! ध्यानेन श्रृणुत। ' इत्यत्रक्रियापदं लिखत। 1

(अ) प्रियच्छात्राः (ब) जनाः (स) ध्यानेन (द) श्रृणुत

**अथवा**

**लवः :- (प्रविश्य, स्वगतम् ) अविज्ञातवयः क्रमौचित्यात् पूज्यानपि सतः कथमभिवादयिष्ये? (विचिन्त्य) अयं पुनरविरुद्धप्रकार इतिवृद्धेभ्यः श्रूयते। (सविनयमुपसृत्य) एष वो लवस्य शिरसाप्रणामपर्यायः।**

**अरुन्धतीजनकौः – कल्याणिन्! आयुष्मान् भूयाः।**

**कौसल्या : –** जात! चिरं जीव।

**अरुन्धती : – एहि वत्स! (लवमुत्सङ्गे गृहीत्वा आत्मगतम्) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरितः।**

**कौसल्या :–** **जात! इतोऽपि तावदेहि। (उत्सङ्गे गृहीत्वा) अहो, न केवलं मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोष-घर्घरानुनादिना स्वरेणच रामभद्रमनुसरति। जात! पश्यामि ते मुखपुण्डरीकम्। (चिबुकमुन्नमय्य, निरूप्य, सवाष्पाकूतम्) राजर्षे! किं न पश्यसि? निपुणंनिरूप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव।**

**(क) एकपदेन उत्तरत -** 1

जात! चिरं जीव। इति कया कथितम् ?

**(ख) पूर्णवाक्येन उत्तरत -** 2

इति वृद्धेभ्यः श्रूयते। किम् ?

**(ग) भाषा-सम्बद्धकार्यम्-**

(i) 'एष वो लवस्य शिरसा प्रमाणपर्यायः ।' वाक्येऽस्मिन् सर्वनामपदं किम् ? 1

(अ) एषः (ब) लवस्य (स) शिरसा (द)प्रमाणपर्यायः

(ii) ' पश्यामि ते मुखपुण्डरीकमहम्। ' इत्यत्रकर्तृपदं लिखत। 1

(अ) पश्यामि (ब) ते (स) मुखपुण्डरीकम् (द) अहम्

**14. रेखाकिंतपदेषु प्रश्ननिर्माणं कुरुत। (केषाञ्चित् त्रयाणाम्)** 3x1=3

(क) अश्वमेध इति नाम <u>क्षत्रियाणां</u> महान् उत्कर्षनिकषः।

(ख) <u>बृहस्पतिः</u> इन्द्राय प्रतिपदशब्दान् उक्तवान् ।

(ग) <u>शरीरमात्रेण</u> नरेन्द्र तिष्ठन् ।

(घ) गच्छन् <u>पिपीलको</u> याति।

(ङ) श्रीनायारः <u>स्वल्पभाषी</u> आसीत्।

**15.अधोलिखितयोः अलङ्कारयोः कस्यचिद् एकस्य लक्षणम् उदाहरणञ्च लिखत।** 3

(क) श्लेषः (ख) अर्थान्तरन्यासः

**खण्डः- "द"**

**16.अधोलिखतरेखाकिंतशब्दान् आधारीकृत्य विभक्तिं तत्कारणञ्च लिखत-(केषाञ्चित् चतुर्णाम्)** 4x1=-4

(क) तेनानुमीयते तस्य <u>राज्ञेन</u> सह अस्ति कश्चित् संपर्कः ।

(ख)<u>स्वार्थोत्पतिं</u> प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः ।

(ग) यच्चोपार्जितानां वित्तं तदपि <u>दानभोगं</u> विना सफलं न भवति ।

(घ)<u>बालकाय</u> मोदकं रोचते ।

BSER

(ङ)लोचनाभ्याम् अन्धः ।

(च)हिमवतः गङ्गा प्रभवति ।

**17. निम्नलिखितयोः कमपिविषयं स्वीकृत्य 50-60 शब्देषु संस्कृतभाषायां निबन्धं लिखत ।** 5

(क) पर्यावरणसंरक्षणम् ।

(ख) संस्कृतभाषायाः महत्त्वम् ।

(ग) विज्ञानस्य प्रयोगः।

**18. अधोलिखतव्याक्यानां संस्कृतभाषायाम् अनुवादः करणीयः। (केषाञ्चित् पञ्चानाम्)** 5x1=5

(क) विद्या विनय प्रदान करती हैं।

(ख) हरि बैकुण्ठ में बैठे है।

(ग) कुत्ते से डरता है ।

(घ) उद्यान के चारोंओर वृक्ष हैं।

(ङ) गुरु शिष्य से प्रश्न पूछता है ।

(च) राम को शहद अच्छा लगता है ।

(छ) कक्षा में राम श्रेष्ठ हैं ।

(ज) पिता को नमस्कार।

BSER